ॐ

# ॥ वाराहीस्तोत्रं ॥

कुवलयनिभ कौशेयार्घोरुका मुकुटोज्ज्वला
हलमुसलिनी सद्भक्तेभ्यो वराभयदायिनी।
कपिलनयना मध्ये क्षामा कठोरघनस्तनी
जयति जगतां मातः सा ते वराहमुखी तनुः॥ १॥
तरति विपदो घोरा दूरात्परिह्रियते भय-
स्खलितमतिभिर्भूतप्रेतैः स्वयं ब्रियते श्रिया।
क्षपयति रिपुनीष्टें वाचां रणे लभते जयं
वश्यति जगत्सर्वं वाराहि यस्त्वयि भक्तिमान्॥ २॥
स्तिमितगतयस्सीदद्वाचः परिच्युतहेतयः
क्षुभितहृदयास्सद्यो नश्यद्दशो गळितौजसः।
भयपरवशा भग्नोत्साहाः पराहतपौरुषाः
भगवति पुरस्त्वद्भक्तानां भवन्ति विरोधिनः॥ ३॥
किसलयमृदुर्हस्तः क्लिश्येत कन्दुकलीलया
भगवति महाभारः कीटासरोरुहमेव ते।
तदपि मुसलं धत्से हस्ते हलं समयद्रुहां
हरसि च तदाघातैः प्राणानहो तव साहसम्॥ ४॥
जननि नियतस्थाने त्वद्वामदक्षिणपार्श्वयः
मृदुलभुजलतामन्दाक्षेपप्रणर्तितमाचरे।
सततमुद्रिते गुह्याचारद्रुहां रुधिरासवै-

रुपशमयतां शत्रून् सर्वानुभे मम दैवते॥ ५॥

हरतु दुरितं क्षेत्राधीशःस्वशानविद्विषां

रुधिरमदिरामत्तः प्राणोपहारबलिप्रियः।

अविरतचटत्कुर्वद्दंष्ट्रास्थिकोटिरटन्मुखो

भगवति स ते चण्डोच्चण्डः सदा पुरतः स्यितः॥ ६॥

क्षुभितमकरैर्वीचीहस्तोपरुद्धपरस्परै-

श्चतुरुदधिभिः कन्ता कल्पान्तदुर्ललितोदकैः॥

जननि कथमुत्तिष्ठेत् पाताळसर्पबिलादिला

तव तु कुटिले दंष्ट्राकोटी न चेदवलम्बनम्॥ ७॥

तमसि बहुळे शून्याटव्यां पिशाचनिशाचर-

प्रमथकलहे चोरव्याघ्रोरगद्विपसङ्कटे।

क्षुभितमनसः क्षुद्रस्यैकाकिनोऽपि कुतो भयं

सकृदपि मुखे मातस्त्वन्नाम सन्निहितं यदि॥ ८॥

विदितविभवं हृद्यैः पद्यैर्वराहमुखीस्तवं

सकलफलदं पूर्णं मन्त्राक्षरैरिममेव यः।

पठति स पटुः प्राप्नोत्यायुश्चिरं कवितां प्रियां

सुतसुखघनारोग्यं कीर्त्तिं श्रियं जयमुर्वराम्॥ ९॥ इत्यनुग्रहाष्टकम्॥

देवि क्रोडमुखि त्वदङ्घ्रिकमलद्वन्द्वानुषक्तात्मने

मह्यं द्रुह्यति यो महेशि मनसा कायेन वाचा नरः।

तस्याद्य त्वदयोऽग्रनिष्ठुरहलाघातप्रभूतव्यथा-

पर्यस्यन्मनसो भवन्तु वपुषः प्राणाः प्रयाणोन्मुखाः॥ १॥

देवि त्वत्पदपद्मभक्तिविभवप्रक्षीणदुष्कर्मणि

प्रादर्भूतनृशंसभावमलिनां वृत्तिं विधत्ते मयि।

यो देहि भुवने तदीपहृदयान्निर्गत्वरैर्लोहितैः

सद्यः पूरयसे कराब्जचषकं वाच्छाफलैर्मामपि॥ २॥

चण्डोच्चण्डमखण्डदुष्टहृदयप्रोक्षिप्तरक्तच्छटा-

हालापानमदाट्टहासजनिताटोप प्रतापोत्कटम्।

मतर्मत्परिपन्थिनामहृत्यैः प्राणैस्त्वदङ्घ्रिद्वय-

ध्यानोद्दामरवैर्भवोदयवशात् सन्तर्पयामि क्षणात्॥ ३

वाराहि व्यथमानमानसगळत्संज्ञं त्वदाज्ञाबलात्

सीदद्धैर्यमपाकृतादुध्यवसितं प्राप्ताखिलार्थाहतिं।

क्रन्दद्बन्धुजनं कळङ्कितकुलं कण्डे व्रणोद्यत्कृमिं

पश्यामि प्रतिपक्षमाशु सततं श्रान्तं लुठन्तं पुनः॥ ४॥

वाराहि त्वमशेषजन्तुषु पुनः प्राणत्मिका स्पन्दसे

शक्तिव्याप्तचराचरामिह खलु त्वामेतदभ्यर्थये।

त्वत्पादाम्बुजसङ्गिनो मम सकृत् पापं चिकीर्षन्ति ये

तेषां त्वं कुरु शङ्करप्रियतमे देहान्तरावस्थितिं ५

विश्वाधीश्वरवल्लभे विजयसे या त्वं नियत्यात्मिके

भूतानां पुरुषायुषावधिकरी पाकप्रदा कर्मणाम्।

तां याचे भवतीं किमप्यवितथं योऽस्मद्विरोधि जन-

स्तस्यायुर्मम वाञ्चितावधि भवेन्मातस्तवैवाज्ञया॥ ६॥

मातस्सम्यगुपासितं जडमतिस्त्वां नाद्य शक्नोम्यहं

यद्यप्यञ्चितदेशिकाङ्घ्रिकमलानुक्रोशपात्रस्य मे।

जन्तुः कञ्चन चिन्तयत्यकुशलं यस्तस्य तद्वैशसं

भूयादेवि विरोधिनो मम च ते श्रेयःपदासङ्गिनः॥ ७॥

श्यामां तामरसारुणत्रिणयनां सोमार्धचूडां जग-

त्त्राणव्यग्रहलामुदग्रमुसलामत्रस्तमुद्रावतीम्।

ये त्वां रक्तकपालिनीं शिववरारोहे वराहाननां

भावे सन्दधते कथं क्षणमपि प्राणन्ति तेषां द्विषः॥ ८॥ इति निग्रहाष्टकम्॥

॥ शुभमस्तु॥

kindly send any corrections/suggestions on this document to menonar@yahoo.com